# रुद्राष्टाध्यायी

## प्रथमोध्याय:

हरिॐ गणानां त्वा गणपति ७ हवामहे प्रियाणां त्वां प्रियपति ७ हवामहे निधीनां त्वा निधिपति ७ हवामहे वसो मम। आहमजानि गर्भधमात्वमजासि गर्भधम् ॥१॥
गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ॥
बृहत्युष्णिहा ककुप्सूचीभि: शम्यन्तु त्वा ॥२॥
द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदा: ।
विच्छन्दा याश्च सच्छन्दा: सूचिभि: शम्यन्तु त्वा ॥३॥
सहस्तोमा: सहच्छन्दस ऽआवृत: सहप्रमा ऽऋषय: सप्त दैव्या: ।
पूर्वेषां पन्थामनुदृश्य धीरा ऽअन्वालेभिरे रथ्यो न रश्मीन् ॥४॥
यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथै वैति ।
दुरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मन: शिव सङ्कल्पमस्तु ॥५॥
येन कर्माण्यपसो मनीषिणोयज्ञे कृण्वन्ति विदथेषु धीरा: ।
यदपूर्व यक्षमन्त: प्रजानां तन्मे मन: शिव संकल्पमस्तु ॥६॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्नऽऋते किञ्चन कर्म क्रियते तन्मे मन: शिव संकल्पमस्तु ॥७॥
येनेदं भूतं भुवनं भविष्यत्परिगृहीतम मृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मन: शिव: संकल्पमस्तु ॥८॥
यस्मिन्नृच: साम यजू ७ षि यस्मिन् प्रतिष्ठितारथना भाविवारा: यस्मिंश्चित्त ७ सर्वमोतं प्रजानां तन्मे मन: शिवसंकल्पमस्तु ॥९॥ सुषारथिरश्वानिव यन्मनुष्यान्ने नीयतेऽभीशुभिर्वाजिन ऽइव । हृत्प्रतिष्ठं, यदजिरं जविष्ठं तन्मे मन: शिवसंकल्पमस्तु ॥१०॥

इति प्रथमोऽध्याय:





## अथ द्वितीयोऽध्याय:

हरि: ॐ सहस्रशीर्षा पुरुष: सहस्राक्ष: सहस्रपात् ।
स भूमि ७ सर्वत स्पृत्वात्यतिष्ठ द्दशाङ्गुलम् ॥१॥
पुरुषऽएवेद ७ सर्वं यद्भूतं यच्च भाव्यम् ।
उता मृतत्वस्येशानो यदन्नेनाति रोहति ॥२॥
एतावानस्य महिमातो ज्यायांश्च पुरूष: ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥
त्रिपादूर्ध्व उदैत्पुरुष: पादोऽस्येहा भवत्पुन:
ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥४॥
ततो व्विराड जायत व्विराजोऽअधि पुरुष: ।
स जातोऽअत्यरिच्यत पश्चाद्भूमिमथोपुर: ॥५॥
तस्माद्यज्ञात् सर्वहुत: सम्भृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥
तस्माद्यज्ञात् सर्वहुतऽऋच: सामानि जज्ञिरे ।
छन्दा ७ सि जज्ञिरे तस्माद्यजुस्तस्माद जायत ॥७॥
तस्मादश्वाऽअजायन्त ये के चोभयादत: ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावय: ॥८॥
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रत: ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥९॥
यत्पुरुषं व्यदधु: कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत्किं बाहू किमूरू पादाऽउच्येते ॥१०॥
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य: कृत: ।
उरू तदस्य यद्वैश्य: पद्भ्या ७ शूद्रोऽअजायत ॥११॥

चन्द्रमा मनसो जाताश्चक्षोः सर्योऽअतायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥
नाभ्या आसीदन्तरिक्ष ॐ शीर्ष्णोद्यौः समवर्त्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ ऽअकल्पयन् ॥१३॥
यत्पुरूषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो ऽस्यासीदाज्यं ग्रीष्मऽइध्मः शरद्धविः ॥१४॥
सप्तास्यासन परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाऽअबध्नन् पुरुषम् पशुम् ॥१५॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वेसाध्याः सन्तिदेवाः ॥१६॥
अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे ।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्व माजानमग्रे ॥१७॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनाय ॥१८॥
प्रजापतिश्चरति गर्भेऽअंतरजायमानो बहुधा वि जायते ।
तस्य योनि परि पश्यन्ति धीरास्त स्मिन्ह तस्थुर्भुवनानि विश्वा ॥१९॥
यो देवेभ्यऽआतपति यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातोनमो रूचाय ब्राह्मये ॥२०॥
रूचं ब्राह्मं जनयंतो देवाऽअग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे ॥२१॥
श्रीश्च ते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणा मुंमऽइषाण सर्वलोकम्मऽइषाण ॥२२॥

इति द्वितीयोऽध्यायः





# अथ तृतीयोऽध्यायः

हरिः ॐ आशुः शिशानो वृषभो न भीमोघनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽ निमिष ऽएक वीरः शत ॐ सेना ऽअजयत्साकमिन्द्रः॥१॥
संक्रन्दनेना निमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥
सऽइषुहस्तैः स निषङ्ग भिर्वशी स ॐ स्रष्टा स युधऽइन्द्रो गणेन ।
स ॐ सृष्टजित्सोमपा बाहु शर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥
बृहस्पते परिदीया रथेन रक्षोहामित्राँ २ ऽअपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेद्ध्यविता रथानाम् ॥४॥
बल विज्ञाय स्थविरः प्रवीरः सहस्वान् वाजी सहमानऽउग्रः ।
अभिवीरो ऽअभिसत्वा सहौजा जैत्रमिंद रथमातिष्ठ गोवित् ॥५॥
गोत्रभिदं गोविदं वज्रबाहुं जयंतमज्म प्रमृणन्तमोजसा ।
इम ॐ सजाताऽअनु वीरयध्वमिन्द्र ॐ सखायोऽनु स ॐ रभध्वम् ॥६॥
अभि गोत्राणि सहसा गाहमानोदयो वीरः शत मन्युरिन्द्र ।
दुश्च्यवनः पृतनाषाडयुध्योऽस्माक ॐ सेना अवतु प्र युत्सु ॥७॥
इंद्र ऽआसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर ऽएतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥८॥
इन्द्रस्य वृष्णो वरूणस्य राज्ञ ऽआदित्यानाँ मरुता ॐ शर्द्धऽउग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥
उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मना ॐ सि ।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥१०॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या ऽइषवस्ता जयन्तु ।
अस्माकं वीराऽउत्तरेभवंस्माँ २ ऽ उ देवा अवता हवेषु ॥११॥

अमीषां चित्तं प्रतिलोभयंती गृहाणाङ्गांन्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शौकैरन्धेना मित्रास्तमसा सचन्ताम् ॥१२॥

अवसृष्टा परापत शरव्येब्रह्म स ꣳ शिते ।
गच्छामित्रान् प्र पद्यस्व मामीषां कंचनोच्छिष: ॥१३॥

प्रेता जयता नरऽइन्द्रो व: शर्म्म यच्छतु ।
उग्रा व: सन्तु वाहवोऽनाधृष्या यथासथ ॥१४॥

असौ या सेना मरुत: परेषामभ्यैति नऽओजसा स्पर्द्धमाना ।
तां गूहत तमसापव्रतेन यथामीऽअन्यो ऽअन्यन्न जानन् ॥१५॥

यत्र बाणा: संपतन्ति कुमारा विशिखाऽइव ।
तन्नऽइन्द्रो बृहस्पतिरदिति: शर्म्म यच्छतु विश्वाहा शर्म यच्छतु ॥१६॥

मर्माणि ते वर्मणाच्छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरूणस्ते कृणोतु जयन्तत्वानु देवा मदन्तु ॥१७॥

इति तृतीयोऽध्याय:







# अथ चतुर्थोऽध्याय:

हरि: ॐ विभ्राड् बृहत्पिबतु सौम्यं मध्वायुर्दधद्यज्ञ पतावविह्रुतम् ।
वातजूतो योऽअभिरक्षतित्मना प्रजा: पुपोष पुरूधा वि राजति ॥१॥
उदुत्यं जातवेदसं देवं वहन्ति केतव: ।
दृशे विश्वाय सूर्यम् ॥२॥
येना पावक चक्षसा भुरण्यन्तं जनां २ ऽअनु ।
त्वं वरूण पश्यसि ॥३॥
दैव्यावध्वर्यूऽआ गत ꣳ रथेन सूर्यत्वचा ।
मध्वा यज्ञ ꣳ समञ्जाथे तं प्रत्नथा। अयं वेनश्चित्रं देवानाम् ॥४॥
तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठताति बर्हिषद ꣳ स्वर्विदम् ।
प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्द्धसे ॥५॥
अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने ।
इममपा ꣳ संगमे सूर्य्यस्य शिशुनं विप्रा मतिभिरिहन्ति ॥६॥
चित्रं देवानामुदगादनीकंचक्षुर्मित्रस्य वरूणस्याग्ने: ।
आप्राद्यावापृथिवी ऽअन्तरिक्ष ꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥७॥
आ न इडाभिर्विदथे सुशस्ति विश्वानर: सविता देव ऽएतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥८॥
यदद्य कच्च वृत्रहन्नुदगाऽ अभि सूर्य्य ।
सर्वं तदिन्द्र ते वशे ॥९॥
तरणिर्विश्व दर्शतो ज्योतिष्कृदसि सूर्य्य ।
विश्वमाभासिरोचनम् ॥१०॥
तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्विततं ꣳ सं जभार ।
यदेदयुक्त हरित: सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥११॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥१२॥
बण्महाँ २ ऽ असि सूर्य बडादित्य महाँ २ ऽ असि महस्ते सतो ।
महिमा पनस्यतेऽद्धा देव महां २ ऽ असि ॥१३॥
बट् सूर्य श्रवसा महाँ २ऽ असि सत्रा देव महाँ २ऽ असि ।
मन्हादेवानामसुर्य्यः पुरोहितो विभुज्योतिरदाभ्यम् ॥१४॥
श्रायन्तऽ इव सूर्य्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनिजाते जनमान ऽओजसा प्रतिभागं न दीधिम् ॥१५॥
अद्या देवाऽउदिता सूर्यस्य निर ँ हसः पिपृता निरवद्यात ।
तन्नो मित्रो वरूणो मामहन्तामदितिः सिंधुः पृथिवीऽउत द्यौः ॥१६॥
आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१७॥

इति चतुर्थोऽध्यायः

## अथ पंचमोऽध्यायः

हरि ॐ नमस्ते रूद्र मन्यव ऽउतो त ऽइषवे नमः बाहुभ्यामुत ते नमः॥१॥
या ते रूद्र शिवा तनुरघोराऽपापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥२॥
यामिषुं गिरिशन्त हस्ते विभर्ष्यस्तवे ।
शिवांगिरित्र तां कुरू मां हि ँ सीः पुरूषं जगत् ॥३॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्व मिज्जगदयक्ष्म ँ सुमनाऽअसत् ॥४॥





अध्यवोच दधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यो ऽधराचीः परासुव ॥५॥
असौ यस्ताम्रोऽअरूण ऽउत बभ्रुः सुमंगलः ।
ये चैन ँ रूद्रा ऽअभितो दिक्षु श्रिताः सहस्रशो ऽ वैषा ँ हेड ऽईमहे ॥६॥
असौ यो ऽवसर्पति नीलग्रीवो विलोहितः उतैन
गोपा ऽअदृश्रन्नदृश्रनुदहार्य्यः स दृष्टो मृडयाति नः ॥७॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुशे ।
अथो ये ऽअस्य सत्वानोऽहं तेभ्योऽकरं नमः ॥८॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योज्याम् ।
याश्च ते हस्त ऽइषवः परा ता भगवो वप ॥९॥
विज्यं धनुः कपर्द्दिनो विशल्यो बाणवाँ२ऽउत ।
अनेशन्नस्य याऽइषव ऽआभुरस्य निषङ्गधिः ॥१०॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मा न्विश्वतस्त्वमयक्ष्मया परि भुज ॥११॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य ऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥१२॥
अवतत्य धनुष्ट्व ँ सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ॥१३॥
नमस्त ऽ आयुधायानातताय धृष्णवे ।
उभाभ्या मुत ते नमो बाहुभ्यां तव धन्वने ॥१४॥
मा नो महान्तमुत मानो ऽअर्भकं मा न ऽउक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रूद्र रीरिषः ॥१५॥
मानस्तोके तनये मा न ऽ आयुषि मा नो गोषु मा नो ऽअश्वेषु रीरिषः।
मा नो वीरान् रूद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥१६॥

नमो हिरण्यवाहवे सेनान्ये दिशां च पतये नमो । नमो वृक्षेभ्यो हरिकेशभ्य: पशूनां पतये नमो नम: शष्पिञ्जराय त्विषीमते: पथीनां पतये नमो। नमो हरिकेशायोपवीतिने पुष्टानां 'पतये नमो-नमो बभ्लुशाय॥१७॥

नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नम: सूतायाहन्त्यै वनानां पतये नमो-नमो रोहिताय ॥१८॥

नमो रोहिताय स्थपतये वृक्षाणां पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नम: ऽउच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो । नम: कृत्स्नायतया ॥१९॥

नम: कृत्स्नायतया धावते सत्वनां पतये नमोनम: सहमानाय निव्याधिन ऽ आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचरवे परिचरायारण्यानां पतये नमो नमो वञ्चते ॥२०॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिणऽइषुधिमते तस्कराणां पतये नमो नम: सृकायिभ्यो जिघा ꣳ सद्भ्यो मुष्णतां पतये नमो नमो ऽसिमद्भ्यो नक्तं चरद्भ्यो विकृन्तानां पतये नम:॥२१॥

नमऽउष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽआतन्वानेभ्य: प्रतिदधानेभ्यश्च वो नमो नमऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो विसृजद्भ्य: ॥२२॥

नमो विसृजद्भ्यो विद्ध्यभ्दयश्च वो नमो नम: स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नम: शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नम: सभाभ्य: ॥२३॥

नम: सभाभ्य: सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नमऽआव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नमऽउगणाभ्यास्तृ ꣳ हतीभ्यश्च वो नमो नमो गणेभ्य: ॥२४॥





नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्व रूपेभ्यश्च वो नमो नम: सेनाभ्य ॥२५॥

नम: सेनाभ्य: सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽ अरथेभ्यश्च वो नमो नम: क्षतृभ्य संग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च वो नम:॥२६॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नम: कुलालेभ्य: कम्मरिभ्यश्च वो नमो नमो निषादेभ्य: पुञ्जिष्ठेभ्यश्च वो नमो नम: श्वनिभ्यो मृगयुभ्यश्च वो नम: ॥२७॥

नम: श्वभ्य: श्वपतिभ्यश्च वो नमो नमो भवाय च रूद्राय च नम: शर्वाय च पशुपतये च नमो नीलग्रीलाय च शितिकण्ठाय च नम: कपर्दिने ॥२८॥

नम: कपर्दिने च व्युप्तकेशाय च नम: सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय ॥२९॥ नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च । नमोऽग्र्याय च प्रथमाय च नमऽआशवे ॥३०॥ नमऽआशवे चाजिराय च नम: शीघ्र्याय च शीभ्याय च नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥३१॥ नमो ज्येष्ठाय च कनिष्ठाय च नम: पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च नम: सोभ्याय ॥३२॥ नम: सोभ्याय प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम: श्लोक्याय चावसान्याय च नम: ऽउर्वर्याय च खल्याय च नमो वन्याय ॥ ३३॥ नमो वन्याय च कक्ष्याय च नम: श्रवाय च प्रतिश्रवाय च नमऽआशुषेणाय चाशुरथाय च नम: शूराय चावभेदिने च । नमो

विल्मिने ॥३४॥ नमो विल्मिने च कवचिने च नमो वर्म्मिणे च वरूथिने च नम: श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च॥ नमो धृष्णवे ॥३५॥ नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नम: स्वायुधाय च सुधन्वने च ॥३६॥ नम: स्रुत्याय च पथ्याय च नम: काट्याय च नीप्याय च नम: कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च। नम: कूप्याय ॥३७॥ नम: कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च। नमो वात्याय ॥३८॥ नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नम: सोमाय च रूद्राय च नमस्ताम्राय चारूणाय च नम: शङ्गवे ॥३९॥ नम: शङ्गवे च पशुपतये च नम:ऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥४०॥ नम: शंभवाय च मयोभवाय च नम: शंकराय च मयस्कराय च नम: शिवाय च शिवतराय च ॥४१॥ नम: पार्याय चावार्याय च नम: प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नम: शष्प्याय च फेन्याय च नम: सिकत्याय ॥४२॥ नम: सिकत्याय च प्रवाह्याय च नम: कि ꣳ शिलाय च क्षयणाय च नम: कपर्दिने च पुलस्तये च नमऽइरिण्याय च प्रपथ्याय च नमो व्रज्याय ॥४३॥ नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नम: काट्याय च गह्वरेष्ठाय च नम: शुष्क्याय ॥४४॥ नम: शुष्क्याय च हरित्याय च नम: पा ꣳ सव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽऊर्व्याय च सूर्व्याय च नम: पर्णाय: ॥४५॥ नम: पर्णाय: च पर्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते च प्रखिदते च नमऽइषुदृभ्यो धनुष्कृद्भ्यश्च





वो नमो नमो व: किरिकेभ्यो देवाना ꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआनिर्हतेभ्य: ॥४६॥ द्रापेऽ अन्धसस्पते दरिद्र नीललोहित। आसां प्रजानामेषां पशूनां मा भेर्मारोङ्मोचन: किं च नाममत् ॥४७॥ इमा रूद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मती:। यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽअस्मिन्ननातुरम् ॥४८॥ या ते रूद्र शिवा: तनू: शिवा विश्वाहा भेषजी। शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥४९॥ परि नो रूद्रस्य हेतिर्वृणक्तु परित्वेषस्य दुर्मतिरघायो:। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥५०॥ मीढुष्टम शिवतम शिवो न: सुमना भव। परमे वृक्षऽआयुधं निधाय कृत्तिं वसानऽआ चर पिना कम्बिभ्रदा गहि ॥५१॥ विकिरिद्रविलोहित नमस्ते ऽअस्तु भगव: यास्ते सहस्र ꣳ हेतयोऽन्यमस्मन्निवपन्तु ता: ॥५२॥ सहस्राणि सहस्रशो बाह्वोस्तव हेतय:। तासामीशानो भगव: पराचीना मुखा कृधि ॥५३॥ असंख्याता सहस्राणि ये रूद्राऽअधिभूम्याम्। तेषां ꣳ सहस्र योजने ऽव धन्वानितन्मसि ॥५४॥ अस्मिन् महत्यर्णवेऽन्तरिक्षे भवाऽअधि। तेषां ꣳ सहस्रयोजने ऽव धन्वानि तन्मसि ॥५५॥ नीलग्रीवा: शितिकण्ठा दिव ꣳ रूद्राऽउपश्रिता:। तेषां ꣳ सहस्र योजनेऽव धन्वानि तन्मसि ॥५६॥ नीलग्रीवा: शितिकण्ठा: शर्वाऽअध: क्षमाचरा: तेषां ꣳ सहस्र योजनेऽव धन्वानि तन्मसि ॥५७॥ ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिता:। तेषां ꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥५८॥ ये भूतानामधिपतयो विशिखास: कपर्दिन:। तेषां ꣳ सहस्र योजनेऽव धन्वानितन्मसि ॥५९॥ ये पथां पथिरक्षय ऽ ऐलवृदा ऽआयुर्युध:। तेषां ꣳ सहस्र योजनेऽव धन्वानि तन्मसि ॥६०॥ ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिण:। तेषां ꣳ सहस्र योजनेऽव धन्वानितन्मसि ॥६१॥ येऽन्नेषु विविध्यन्ति पात्रेषु

पिबतो जनान् । तेषां ॐ सहस्त्र योजनेऽव धन्वानि तन्मसि ॥६२॥ व ऽ एतावन्तश्च भूया ॐ सश्च दिशो रूद्रा वितस्थिरे। तेषां ॐ सहस्त्र योजनेऽव धन्वानि तन्मसि ॥६३॥ नमोऽस्तु रूद्रेभ्यो ये दिवि येषां वर्ष मिषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशो - दीचीर्दशोर्ध्वाः । तेभ्यो नमोऽस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मोयश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६४॥ नमोऽस्तु रूद्रेभ्यो येऽन्तरिक्षे येषां वातऽइषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६५॥ नमोऽस्तु रूद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६६॥

इति पञ्चमोऽध्यायः

## अथ षष्ठोऽध्यायः

ॐ व्वय ॐ सोमव्रतेतवमनस्तुनूपुबिभ्रतः । प्रजावन्तः सचेमहि ॥१॥ एषते रूद्र भागः सहस्वस्राम्बिकया तं जुषस्व स्वाहैषते । रूद्र भागऽआखुस्ते पशुः ॥२॥ अव रूद्रमदी मह्यवदेवं त्र्यम्बकम् । यथा नो वस्य सस्करद्यथानः श्रेयस्करद्यथा नो व्यवसाययात् ॥३॥ भेषजमसि भेषजङ्गवे श्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥ ४॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् उर्वारूकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् । त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् उर्वारूकमिव बन्धनादितो मुक्षीय





मामुतः ॥५॥ एतत्ते रूद्रावसंतेन परो मूजवतोतीहि । अवततधन्वा पिनाकावसः कृत्तिवासा ऽअहि ॐ सन्नः शिवोऽतीहि ॥६॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम् ॥७॥ शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हि ॐ सीः निवर्त्त याम्यायुषे ऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय ॥८॥

इति षष्ठोऽध्यायः

## अथ सप्तमोऽध्यायः

हरिः ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वांश्चाभियुग्वा च विक्षिपः स्वाहा ॥१॥ अग्नि ॐ हृदयेनाशनि ॐ हृदयाग्रेण पशुपति कृत्स्नहृदयेन भवं यक्ना । शर्वम्मतस्नाभ्या मीशानं मन्युना महादेवमन्तः पर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनिकोश्याभ्याम् ॥२॥ उग्रं लोहितेन मित्र ॐ सौव्रत्येन रूद्रं दौव्रत्ये नेन्द्र प्रक्रीडेन मरूतो बलेन साध्यान् प्रमुदा । भवस्य कण्ठ्य ॐ रूद्रस्यान्तः पार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपते पुरीतत् ॥३॥ लोमभ्यः स्वाहा लोमभ्यः स्वाहा त्वचे स्वाहा त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा । मा ॐ सेभ्य स्वाहा मा ॐ सेभ्यः स्वाह । स्नावभ्यः स्वाहा स्नावभ्यः स्वाहा अस्थभ्यः स्वाहा अस्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा । रेतसे स्वाहा पायवे स्वाहा ॥४॥ आयासाय स्वाहा प्रायासाय स्वाहा संयासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा । शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥५॥ तपसे स्वाहा तप्यते स्वाहा तप्यमान स्वाहा

तप्ताय स्वाहा घर्माय स्वाहा । निष्कृत्यै स्वाहा प्रायश्चित्यै स्वाहा भेषजाय स्वाहा ॥६॥ यमाय स्वाहान्तकाय स्वाहा मृत्यवे स्वाहा । ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्य: स्वाहा द्यावापृथिवीभ्या ᳬ स्वाहा ॥७॥

इति सप्तमोऽध्याय:

## अथाष्टमोऽध्याय:

हरि: ॐ वाजश्च में प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च में क्रतुश्च से स्वरश्च मे श्लोकश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम ॥१॥ प्राणश्च मेऽपानश्च मे व्यानश्च मे ऽसुश्च मे चित्तं च मऽआधीतं च मे वाक् च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च मे यज्ञेन कल्पन्ताम् ॥२॥ ओजश्च मे सहश्च मऽआत्मा च मे तनूश्च मे शर्म च मे वर्म च मे ऽङ्गानि च मे ऽस्थीनि च मे परू ᳬ षि च मे शरीराणि च म ऽ आयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥३॥ ज्येष्ठ्यं च मऽआधिपत्यं च मे मन्युश्च मे भामश्च मे ऽमश्च मे ऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥ (प्रथमो विश्राम:) सत्यं च मे, श्रद्धा च मे, जगच्च मे धनं च मे विश्वं च मे महश्च में क्रीड़ा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पन्ताम् ॥५॥ ऋतं च मे ऽमृतं च मे ऽयक्ष्मं च मे ऽ नामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मे ऽनमित्र च मे ऽभयं च मे सुखं च मे श्यनं च मे सूषाश्च मे सुदिनं च मे यज्ञेन कल्पन्ताम् ॥ ६॥ यन्ता च मे धर्त्ता च





मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे यज्ञेन कल्पन्ताम् ॥७॥ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनश्च मे भगश्च मे द्रविणं च मे भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥८॥ (द्वितीयो विश्राम:) ऊर्क् च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च मे ऽऔद्भिद्यं च मे यज्ञेन कल्पन्ताम् ॥९॥ रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे कुयवं च मेऽक्षितं च मेऽन्नं च मे ऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥१०॥ वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथ्यं च मऽऋद्धं च मऽऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥११॥ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मे ऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्चमे यज्ञेन कल्पन्ताम् ॥१२॥ (तृतीयो विश्राम:) अश्मा च मे मृत्तिकाश्च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे श्यामं च मे लोहञ्च मे सीसं च मे त्रपु च मे यज्ञेन कल्पनताम् ॥१३॥ अग्निश्च मऽआपश्च मे वीरुधश्च मऽओषधयश्च मे कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशवऽआरण्याश्च मे वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥१४॥ वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ऽर्थश्च मऽ एमश्च मऽ इत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम् ॥१५॥ (चतुर्थो विश्राम:) अग्निश्च मऽ इन्द्रश्च मे सोमश्च मऽइन्द्रश्च मे सविता च मऽइन्द्रश्च मे सरस्वती च मऽइन्द्रश्च मे पूषा

च मऽइन्द्रश्च मे बृहस्पतिश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१६॥ मित्रश्च मऽइन्द्रश्च मे वरुणश्च मऽइन्द्रश्च मे धाता च मऽइन्द्रश्च मे, त्वष्टा च मे ऽइन्द्रश्च मे मरुतश्च मऽइन्द्रश्च मे विश्वे च मे देवाऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१७॥ पृथिवी च मऽइन्द्रश्च मे ऽन्तरिक्षं च मऽइन्द्रश्च मे द्यौश्च मऽइन्द्रश्च मे समाश्च मऽइन्द्रश्च मे नक्षत्राणि च म ऽइन्द्रश्च मे दिशश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१८॥ (पंचमो विश्राम:) अ ꣳ शुश्च मे रश्मिश्च मेऽदाभ्यश्च मे ऽधिपतिश्च म ऽउपा ꣳ शुश्च मेऽन्तर्यामश्च म ऽऐन्द्र वायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१९॥ आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरूत्वती याश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२०॥ स्रुवश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च मऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वागाकारश्च मे यज्ञेन कल्पन्ताम् ॥२१॥ (षष्ठो विश्राम:) अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे ऽदितिश्च मे द्यौश्च मे ऽङ्गुलय: शक्करयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥२२॥ व्रतं च मऽऋतवश्च मे तपश्च मे संवत्सरश्च मे ऽहोरात्रे ऽऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥२३॥ (सप्तमो विश्राम:) एका च मे तिस्रश्च मे तिस्रश्च मे पंच च मे पंच च मे सप्त मे सप्त च मे नव च मे नव च म ऽएकादशश्च म ऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पंचदश च मे पंचदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म ऽएकवि ꣳ शतिश्च म ऽएकवि ꣳ





शतिश्च मे त्रयोवि ꣳ शतिश्च मे त्रयोवि ꣳ शतिश्च मे पंचवि ꣳ शतिश्च मे पंचवि ꣳ शतिश्च मे सप्तवि ꣳ शतिश्च मे सप्तवि ꣳ शतिश्च मे नववि ꣳ शतिश्च मे नववि ꣳ शतिश्च म ऽएकत्रि ꣳ शच्च म ऽएकत्रि ꣳ शच्च मे त्रयस्त्रि ꣳ शच्च मे यज्ञेन कल्पन्ताम् ॥२४॥ (अष्टमो विश्राम:) चतस्रश्च मे ऽष्टौ च मे ऽष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे वि ꣳ शतिश्च मे वि ꣳ शतिश्च मे चतुर्वि ꣳ शतिश्च मे चतुर्वि ꣳ शतिश्च मे ष्टाविं ꣳ शतिश्च मे ष्टावि ꣳ शतिश्च मे द्वात्रि ꣳ शच्च मे द्वात्रि ꣳ शच्च मे षट्त्रि ꣳ शच्च मे षट्त्रि ꣳ शच्च मे चत्वारि ꣳ शच्च मे चत्वारि ꣳ शच्च मे चतुश्चत्वारि ꣳ शच्च मे चतुश्चत्वारि ꣳ शच्च मे ऽष्टाचत्वारि ꣳ शच्च मे यज्ञेन कल्पन्ताम् ॥२५॥ (नवमो विश्राम:) त्र्यविश्च मे त्र्यवीच मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावीश्च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥२६॥ षष्ठवाट् च मे पष्ठौही च मऽउक्षा च मे वशा च मऽऋषभश्च मे वेहच्च मेऽनड्वांश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥२७॥ (दशमो विश्राम:) व्वाजाय स्वाहा प्रसवाय स्वाहा पिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहा ऽहर्पतये स्वाहा न्हे मुग्धाय स्वाहा मुग्धायावैन ꣳ शिनाय स्वाहा विन ꣳ शिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजा पतये स्वाहा। इयं ते राण्मित्राय यंतासि यमनऽऊर्जे त्वा वृष्ट्यै त्वा प्रजानांत्वाधिपत्याय ॥२८॥ आयुर्यज्ञेन कल्पन्ताम् प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पता ꣳ श्रोत्रं यज्ञेन कल्पतां वाग् यज्ञेन कल्पतां मनोयज्ञेन कल्पतां आत्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पता ꣳ स्वर्यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पतां यज्ञोयज्ञेन कल्पताम्। स्तोमश्च

यजुश्च ऽऋक् च साम च वृहच्च रथन्तरञ्च स्वर्देवाऽअगन्मामृताऽअभूम प्रजापते: प्रजाऽअभूम वेट स्वाहा ॥२१॥

इति अष्टमोऽध्याय:

## अथ शान्त्यध्याय:

''हरि ॐ'' ऋचं वाचं प्र पद्ये मनो यजु: प्र पद्ये साम प्राणं प्र पद्ये चक्षु: श्रोत्रं प्र पद्ये । वागोज: सहौजो मयि प्राणापानौ ॥१॥ यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मेतद्दधातु शंनो भवतु भुवनस्य यस्पति: ॥२॥ ॐ भूर्भुव: स्व: तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो न: प्रचोदयात् ॥३॥ कया नश्चित्र ऽ आ भुवदूती सदावृध: सखा। कया शचिष्ठया वृता ॥४॥ कस्त्वा सत्यो मदानां म ꣳ हिष्ठो मत्सदन्धस: । दृढ़ा चिदारूजे वसु ॥५॥ अभी षुण: सखीनामविता जरितृणाम् । शतं भवास्यूतिभि: ॥६॥ कया त्वं न ऽऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्यऽ आ भर ॥७॥ इन्द्रो विश्वस्य राजति । शन्नो ऽ अस्तु द्विपदे शं चतुष्पदे ॥८॥ शन्नो मित्र: शं वरूण: शन्नो भवत्यर्य्यमा शन्नऽइन्द्रो बृहस्पति: शं नो विष्णुरुरुक्रम:॥९॥ शन्नो वात: पवता ꣳ शन्नस्तपतु सूर्य: । शन्न: कनिक्रदद्देव: पर्जन्योऽ अभि वर्षतु ॥१०॥ अहानि शं भवन्तु न: श ꣳ रात्री: प्रतिधीयताम् । शन्न इन्द्राग्नी भवतामवोभि: शन्नऽइन्द्रावरूणा रातहव्या । शन्नऽइन्द्रा पूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंयो: ॥११॥ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शंयोरभि स्त्रवन्तु न: ॥१२॥ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा न शर्म सप्रथा: ॥१३॥ आपो हिष्ठा मयोभुवस्ता नऽ ऊर्जे दधातन । महेरणाय चक्ष से ॥१४॥ यो व:





शिवतमो रसस्तस्य भाजयतेह न: उशतीरिव मातर: ॥१५॥ तस्माऽअरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च न: ॥१६॥ ॐ द्यौ: शान्तिरन्तरिक्ष ꣳ शान्ति:। पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति: । वनस्पतय: शान्तिर्विश्वे देवा: शान्तिर्ब्रह्म शांति: सर्व ꣳ शांति: शान्तिरेव शान्ति: सा मा शान्तिरेधि ॥१७॥ दृते दृ ꣳ ह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् । मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥१८॥ दृते दृ ꣳ हमा ज्योत्केसन्दृशिजीव्व्यासञ्ज्योत्केसन्दृशिजीव्व्यासम् ॥१९॥ नमस्तेहर सेशोचिषेनमस्तेऽअस्त्वर्च्चिषे । अन्न्यांस्तेऽअस्म्मत्तपन्तुहेतय: पावको अस्मभ्य ꣳ शिवो भव ॥२०॥ नमस्ते अस्तुविद्युतेनमस्तेस्तनयित्नवे । नमस्ते भगवन्नस्तुयत: स्व: समीहसे ॥२१॥ यतोयत: समीहसेततोनोऽअभयंकुरु शन्न: कुरु प्रजाभ्योभयन्न: पशुभ्य: ॥२२॥ सुमित्रियानऽआपऽओषधय: सन्तुदुर्म्मित्रि यास्तस्म्मैसन्तु योस्म्मान्द्वेष्टि यञ्चव्व्यन्द्विष्म्म: ॥२३॥ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्क्र मुच्चरत् । पश्येमशरद: शतञ्जीवेमशरद: शत ꣳ शृणुयामशरद: शतम्प्रब्रवाम शरद: शतमदीना: स्यामशरद: शतम्भूयश्च शरद: शतात् ॥२४॥

इति शान्त्यध्याय:

# अथ स्वस्तिप्रार्थनामन्त्राः

हरिः ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो वृहस्पतिर्दधातु ॥१॥ ॐ पयः पृथिव्यां पयऽ ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः। पयस्वतीः प्रदिशः सन्तु मह्यम ॥२॥ विष्णोरराटमसिविष्णोः श्नप्त्रेस्थोव्विष्णोः स्यूरसिविष्णोर्ध्रुवोऽसि । व्वैष्णवम सिव्विष्णवेत्त्वा ॥३॥ ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रूद्रा देवताऽदित्या देवता मरूतो देवता विश्वेदेवा देवता वृहस्पतिर्देवतेन्द्रो देवता वरूणो देवता ॥४॥ ॐ सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः । भवे भवेतानि भवे भवस्व माँ भवोद्भवाय नमः ॥५॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रूद्राय नमः । कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥६॥ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः ॥७॥ तत्पुरूषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥८॥ ईशानः सर्व-विद्यानामीश्वरः सर्वभूतानाम्। ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे ऽ अस्तु सदा शिवो ऽम् ॥९॥ शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तुमा मा हि ꣳ सीः निवर्त्तयाम्या युषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥११॥ विश्वानि देव सवितर्दुरितानि परासुव । यद् भद्रं तन्न आसुव ॥१२॥ द्यौः शान्तिरन्तरिक्ष ꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥१३॥ सर्वेषां वा एष वेदानां रसो यत्साम । सर्वेषामेवैनमेतद्वेदाना ꣳ रसेनाभिषिञ्चति ॥१४॥ ॐ शांतिः शांतिः सुशातिर्भवतु सर्वारिष्ट शांतिर्भवतु । अनेन रूद्राभिषेक कर्मणा भवानीशंकर महारूद्रः प्रीयतां न मम । ॐ सदाशिवार्पणमस्तु ॥

इति स्वस्तिप्रार्थनामन्त्राः





अथ षडंगोगन्यास :-

ॐ मनोजूतिर्जुषतामाज्ज्यस्यवृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञ ꣳ समिमन्दधातु ॥ विश्वेदेवा सऽइहमादयन्तामो प्रतिष्ठ ॥ ॐ हृदयाय नमः॥ १ ॥ ॐ अबोद्ध्यग्निः समिधाजनानाम्प्रति धेनुमिवायतीमुषासम् । यह्वा ऽइवप्रवया मुज्जिहानाः प्रभानवः सिस्रतेनाकमच्छ ॥ ॐ शिरसे स्वाहा ॥२॥ ॐ मूर्द्धानन्दिवो ऽअरतिपृथिव्या वैश्श्वानरमृत ऽआजा तमग्निम्। कविः ꣳ सम्राजमतिथिञ्जनानामासन्ना पात्रञ्जन - यन्तदेवाः । ॐ शिखायैवषट् ॥३॥ ॐ मर्म्माणितेवर्म्मणाच्छादया - मिसोमस्त्वाराजा मृतेनानु वस्ताम् ॥ उरोर्व्वरीयोव्वरूणस्ते कृणो तुजयन्तन्त्वानु देवामदन्तु ॥ ॐ कवचाय हुम् ॥४॥ ॐ विश्वतश्चक्षु - रूतविश्वतोमुखोविश्वतो बाहुरूत विश्वतस्पात् । सम्बाहुभ्याम्ध - मतिसम्पतत्रैर्द्यावा भूमीजनयन्देव ऽएकः । ॐ नेत्रत्रयाय वषट् ॥५॥ ॐ मानस्तोके तनये मानऽआयुषिमानो गोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान् रुद्र भामिनोव्व-धीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ॐ अस्त्रायफट् ॥६॥

ध्यानम् :- ध्यायेन्नित्यम्महेशं रजतगिरिनिभं चारुचन्द्रावतंसं ।
रत्नाकल्पोज्वलाङ्गंपरशुमृगवराभीति हस्तम्प्रसन्नम्
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्
विश्वाद्यं विश्ववन्द्यंनिखिलभयहरम्पञ्चवक्त्रंत्रिनेत्रम् नमः
पार्वतीपते हर हर हर महादेव ।

# शिवताण्डवस्तोत्रम्

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम् ।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥ १ ॥

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी
विलोलवीचिवल्लरीविराजमानमूर्द्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥ २ ॥

धराधरेन्द्रनन्दिनी विलासबन्धुबन्धुर -
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरूद्धदुर्धरापदि
क्वचिद्दिगम्बरेमनोविनोदमेतु वस्तुनि ॥ ३ ॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा -
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनोविनोदमद्भुतं बिभर्तु भूतभर्तरि ॥ ४ ॥

सहस्रलोचनप्रभृत्यशेषलेखशेखर -
प्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटकः
श्रियैचिरायजायतां चकोरबन्धुशेखरः ॥ ५ ॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा -
निपीतपञ्चसायकं नमन्निलिम्पनायकम्





सुधामयूखलेखया विराजमानशेखरं
महाकपालि सम्पदे शिरो जटालमस्तु नः ॥ ६ ॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल -
द्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक -
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥ ७ ॥

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुर-
त्कुहूनिशीथिनीतमः प्रबन्धबद्धकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः ॥ ८ ॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा-
वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥ ९ ॥

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरी -
रसप्रवाहमाधुरी विजृम्भणामधुव्रतम्
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥ १० ॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस-
द्विनिर्गमत्क्रमस्फुरत्कराल भालहव्यवाट् ।
धिमिद्धिमिद्धिमिद्ध्वनन्मृदङ्गतुङ्गमङ्गल -
ध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः ॥ ११ ॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजो -
र्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समप्रवृत्तिकः कदा सदाशिवं भजाम्यहम् ॥ १२ ॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरः स्थमञ्जलिं वहन्
विलोललोललोचनो ललामभाललग्नकः
शिवेति मन्त्रमुच्चरन् कदा सुखी भवाम्यहम् ॥ १३ ॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेति संततम्
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिन्तनम् ॥ १४ ॥

पूजावसानसमये दशवक्त्रगीतं
यः शम्भुपूजनपरं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मी सदैव सुमुखी प्रददाति शम्भुः ॥ १५ ॥







# श्री लिङ्गाष्टकम्

ब्रह्ममुरारिसुरार्चितलिंगम् निर्मलभाषितशोभितलिङ्गम्।
जन्मजदुःखविनाशकलिङ्गम् तत्प्रणमामिसदाशिवलिङ्गम् ॥ १ ॥
देवमुनिप्रवरार्चितलिङ्गम् कामदहंकरूणाकरलिङ्गम्
रावणदर्पविनाशनलिङ्गम् तत्प्रणमामिसदाशिवलिङ्गम् ॥ २ ॥
सर्वसुगन्धिसुलेपितलिङ्गम् बुद्धिविवर्धनकारणलिङ्गम्
सिद्धसुरासुरवन्दितलिङ्गम् तत्प्रणमामिसदाशिवलिङ्गम् ॥ ३ ॥
कनकमहामणिभूषितलिङ्गम् फणिमणिवेष्टितशोभितलिङ्गम्
दक्षसयज्ञविनाशनलिङ्गम् तत्प्रणमामिसदाशिवलिङ्गम् ॥ ४ ॥
कुंकुमचन्दनलेपितलिङ्गम् पंकजहारसुशोभितलिङ्गम्
संचितपापविनाशनलिङ्गम् तत्प्रणमामिसदाशिवलिङ्गम् ॥ ५ ॥
देवगणार्चितसेवितलिङ्गम् भावैभक्तिभिरेवचलिङ्गम्
दिनकरकोटिप्रभाकरलिङ्गम् तत्प्रणमामिसदाशिवलिङ्गम् ॥ ६ ॥
अष्टदलोपरिवेष्टितलिङ्गम् सर्वसमुद्भवकारणलिङ्गम्
अष्टदरिद्रविनाशितलिङ्गम् तत्प्रणमामिसदाशिवलिङ्गम् ॥ ७ ॥
सुरगुरूसुरवरपूजितलिङ्गम् सुरवरपुण्यसदार्चितलिङ्गम्
परात्परपरमात्मकलिङ्गम् तत्प्रणमामिसदाशिवलिङ्गम् ॥ ८ ॥
लिंगाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ
शिवलोकमवापनोति शिवेन सह मोदते ॥ ९ ॥

# आरती

अभिषेक के पश्चात उत्तर पूजन सम्पन्न कर आरती जलायें व गन्धाक्षत पुष्पों से पूजन कर नीचे लिखे मंत्र व पदो द्वारा शिव जी की आरती करें ।

मंत्र :- ॐ चन्द्रमा मनसोजातश्चक्षो: सूर्योऽजायत
श्रोताद्वायुश्चप्राणश्च मुखादग्नि रजायत ।

ॐ जय गङ्गाधर जय हर जय गिरिजाधीश ।
त्वं मां पालय नित्यं कृपया जगदीश ॥१॥ ॐ हर हर हर महादेव
कैलासे गिरिशिखरे कल्पद्रुमविपिने ।
गुञ्जतिमधुकरपुञ्जे कुञ्जवने गहने ॥
कोकिल कूजित खेलत हंसावन ललिता ।
रचयति कलाकलापं नृत्यति मुदसहिता ॥२॥ ॐ हर हर हर महादेव
तस्मिंल्ललितसुदेशे शाला मणिरचिता ।
तन्मध्ये हरनिकटे गौरी मुदसहिता ॥
क्रीडा रचयति भूषारञ्जित निजमीशम् ।
इन्द्रदिक सुर सेवत नामयते शीशम् ॥३॥ ॐ हर हर हर महादेव
बिबुधवधू बहु नृत्यत हृदये मुदसहिता ।
किन्नर गायन कुरूते सप्त स्वर सहिता ॥
धिनकत थै थै धिनकत मृदङ्ग वादयते ।
क्वण क्वण ललिता वेणुं मधुरं नादयते ॥४॥ ॐ हर हर हर महादेव





रुण रुण चरणे रचयति नुपूर मुज्ज्वलिता ।
चक्रावर्ते भ्रमयति कुरूते तां धिक ताम् ॥
तां तां लुप चुप तां तां डमरू वादयते ।
अंगुष्ठांगुलिनादं लासकतां कुरूते ॥५॥ ॐ हर हर हर महादेव
कर्पूरद्युतिगौरं पञ्चाननसहितम् ।
त्रिनयनशशिधरमौलिं पावकयुतभालम् ।
सुन्दरजटाकलापं पावकयुतभालम् ।
डमरूत्रिशूल पिनाकं करधृतनृकपालम ॥६॥ ॐ हर हर हर महादेव
मुण्डै रचयति माला पन्नगमुपवीतम् ।
वामविभागे गिरिजारूपम् अतिललितम् ॥
सुन्दरसकलशरीरे कृतभस्माभरणम् ।
इति वृषभध्वजरूपं तापत्रयहरणम् ॥७॥ ॐ हर हर हर महादेव
शंखनिनादं कृत्वा झल्लरि नादयते ।
नीराजयते ब्रह्मा वेदऋचां पठते ॥
अतिमृदुचरणसरोजं हृत्कमले धृत्वा ।
अवलोकयति महेशं ईशं अभिनत्वा ॥८॥ ॐ हर हर हर महादेव
ध्यानं आरति समये हृदये अति कृत्वा ।
रामस्त्रिजटानाथं ईशं अभिनत्वा ॥
संगतिमेवं प्रतिदिन पठनं यः कुरूते ।
शिवसायुज्यं गच्छति भक्त्या यः श्रृणुते ॥९॥ ॐ हर हर हर महादेव

## मंत्रपुष्पांजलि:

ॐ यज्ञेनयज्ञमयजन्तदे वास्तानिधर्माणि प्रथमान्यासन। तेहनाकम्महिमान: सचंतयत्रपूर्व्वेसाध्या: सन्तिदेवा:। ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे। स मे कामान्कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु ॥ कुबेराय वैश्रवणाय महाराजाय नम: ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्सार्वभौम: सार्वायुषऽआन्तादापरार्धात्पृथिव्यै समुद्रपर्यन्तायाऽएकराडिति। तदप्येषश्लोकोभिगीतो मरूत: परिवेष्टारो मरूत्तस्यावसन्गृहे आवीक्षितस्य कामप्रेर्व्विश्वेदेवा: सभासद इति। ॐ व्विश्वतश्चक्षुरूतव्विश्वतोमुखो व्विश्वतो बाहुरूतव्विश्वतस्पात्। सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमी जनयन्देव एक:।

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात्। ॥ ॐ कात्यायन्यै च विद्महे। कन्या कुमार्यै च धीमहि तन्नो देवी प्रचोदयात्। ॐ महासेनाय विद्महे। वाग्विशुद्धाय धीमहि तन्न: स्कन्द: प्रचोदयात्। ॐ हरिवक्त्राय विद्महे। रूद्रवक्त्राय धीमहि तन्नो नन्दी प्रचोदयात्। ॐ तत्पुरूषाय विद्महे। महादेवाय धीमहि तन्नोरूद्र: प्रचोदयात् मंत्र पुष्पाञ्जलिं समर्पयामि श्री साम्बसदाशिवाय नम: ॥

प्रदक्षिणा :- ॐ ये तीर्थानि प्प्रचरन्ति सृकाहस्तानिषङ्गिण:। तेषा ध्व सहस्त्रयोजनेऽवधन्वानि तन्मसि ॥ ॐ सप्तास्यासन् परिधयस्त्रि: सप्त समिध: कृता:। देवा यद्यज्ञं तन्वानाऽअवध्नन् पुरूषं पशुम् ॥

प्रणाम :- ॐ नम: सर्वहितार्थाय जगदाधार हेतवे।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृत: ॥

क्षमा प्रार्थना :- आवाहनं न जानामि न जानामि विसर्जनम्।
पूजां चैव न जानामि क्षमस्व परमेश्वर ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर।





यत्पूजितं मया देव! परिपूर्णं तदस्तु मे ॥

तिलकाशीर्वाद:-ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते।
धान्यं धनं पशुं बहुपुत्र लाभं शतसंवत्सरं दीर्घमायु:॥
मन्त्रार्था: सफला सन्तु पूर्णा: सन्तु मनोरथा:।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥
ॐ शान्ति: शान्ति: शान्ति: ॐ शक्राय नम:।
( पृथ्वी में जल छोड़कर आँखों से लगायें )।

श्री रूद्राभिषेक द्रव्यम् :- लिख्यते च मया द्रव्यमभिषेकात्मकं परम्
जलेन वृष्टिमाप्नोति व्याधिशान्त्यै कुशोदकै: ॥१॥
दध्ना च पशुकामाय श्रिया इक्षुरसेन च
मध्वाज्येन धनार्थी स्यान्मुमुक्षुस्तीर्थ वारिणा ॥२॥
पुत्रार्थी पुत्रमाप्नोति पयसां चाभिषेचनात्।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याऽङ्गना ॥३॥
सद्य: पुत्रमवाप्नोति पयसां चाभिषेचनात्।
ज्वरप्रकोप शान्त्यर्थं जलधारा शिवप्रिया ॥४॥
घृतधारा शिवे कार्यायावन्मंत्र सहस्रकम्
तदा वंशस्य विस्तारो जायते नात्र संशय:॥५॥
प्रमेह रोग शान्त्यर्थं प्राप्नुवान्मानसेप्सितम्
केवलं दुग्धधारा च तदा कार्या विशेषत: ॥६॥
शर्करा मिश्रिता तत्र यदा बुद्धिर्जड़ा भवेत्।
श्रेष्ठा बुद्धिर्भवेत्तस्य कृपया शंकरस्य च ॥७॥
सार्षपेणैव तैलेन शत्रुनाशो भवेदिह
मधुना यक्ष्मराजोऽपि गच्छेद्वै शिव पूजनात् ॥८॥
पापक्षयार्थी मधुना निर्व्याधि: सर्पिषा तथा।
जीवनार्थी तु पयसा श्री कामीक्षुरसेन वै ॥९॥
पुत्रार्थी शर्करायास्तु रसेनार्चेच्छिवं तथा
महालिंगाभिषेकेण सुप्रीत: शंकरो मुदा इति ॥१०॥